# Shri Sharada Stavanam

# શ્રીશારદાસ્તવનમ્ ૨

## Document Information

Text title : Sharada Stavanam 2

File name : shAradAstavanam2.itx

Category : devii, sarasvatI, ApaTIkara

Location : doc_devii

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

Shri Sharada Stavanam

# શ્રીશારદાસ્તવનમ્ ૨

(રાગઃ કેદાર)

દેવિ શારદે નિર્મલ-મતિદે શરણં તવ પદકમલમ્ ।
પ્રસન્નવદને સુધાંશુવસને નાશય મમ મતિ-તિમિરમ્ ॥ ૧॥

વિશ્વવન્દિતે ગાનરઞ્જિતે તન મે મનસિ નિવાસમ્ ।
સત્વરમુદ્ધર માં ભવસાગરપતિતં હા વિલપન્તમ્ ॥ ૨॥

બહુસુખદાયિનિ દુરિતવિનાશિનિ સંહર તાપત્રિતયમ્ ।
સુવર્ણરચિતે નવરસમુદિતે કરુણાં કુરુ વિનતોઽહમ્ ॥ ૩॥

વીણાધારિણિ મયૂરવાહિનિ હૃદયે વસ મે સતતમ્ ।
જ્ઞાનકરીમજ્ઞાનસંહરી વન્દેઽહં ત્વામનિશમ્ ॥ ૪॥

વાદયસિ ત્વં વીણાં સતતં નયસિ લયં ચ વિષાદમ્ ।
જ્ઞાનવિહીનં વ્યર્થં સકલં કથયસિ તત્ત્વં વિમલમ્ ॥ ૫॥

સ્વયમ્ભુ-તનયે દયાર્દ્રહૃદયે વ્યપનય માનસ-તાપમ્ ।
પ્રતિભાશાલિનિ સરોજવાસિનિ કુરુ મે પ્રતિભાવન્તમ્ ॥ ૬॥

પ્રણત-ભક્તજન-દુઃખ-વિનાશનમેતત્ ત્વદીયકાર્યમ્ ।
અધ્યયને યે નિરતાઃ સદયે વિતરસિ તેષુ જ્ઞાનમ્ ॥ ૭॥

તનયમધીરં જનનિ સત્વરં પાયય દિવ્ય-સ્તન્યમ્ ।
ઘનાન્ધતિમિરે સુઘોરવિપિને ધીરય માર્ગભ્રષ્ટમ્ ॥ ૮॥

તવ પદકમલે વિલસતુ વિમલે મદીય-જીવનપદ્મમ્ ।
નાન્યકામનાં નાન્યયાચનાં કાઙ્ક્ષતિ ભગવતિ ચિત્તમ્ ॥ ૯॥

ઇતિ શ્રી આપટીકરવિરચિતં શ્રીશારદાસ્તવનં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

*Shri Sharada Stavanam*

pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*